No. ४५३६

Title आवसथ्याधान पद्धति:

Author ✓

Extent ३६ Age शके. १५२०

Subject सूत्र. प. परिशिष्टं

अग्न्याधेयपद्धतिः आवसथ्याधान
पद्धतिकी

४५३६

F. = 36

सञ्ज्ञाप्तन

नवाडीपरमानंदस्य

सिमन्

कारिकार्थौएतद्दहपतौ प्रेतेकुर्या
ाद्दशाहनि ॥ आगेवैकाहशास्त्रा
वृद्धिश्राद्धविवर्जितं ॥

श्रीगणेशाय नमो नमः ॥ ॥ अग्न्याधेयपद्धतिः ॥ प्रथमतः क्ककुकरणं ॥ तदस
नवेधे त्वुदानं । तदभावे तन्मूल्यदानं ॥ तदभावे गायत्र्ययुतजपः । तदभावे प्रा
णायामशतद्वयं । तदभावे मिकृपद्वादश्या विप्रभोजनं । पौर्णमास्याधानपक्षे
चतुर्दश्यां कृतं तन्नैत्यको यजमानो मातृपूजापूर्वकं नववैदेवत्यं । आभ्युदयिकं श्रा
द्धं कृत्वा ब्राह्मणं वृणीते । तत्र वाक्यं । अद्येत्यादि देशकालौ स्मृत्वाम्बोऽहं शुद्धाग्निमा
धास्ये तत्र त्वं अस्माकं ब्रह्मा भव भवामीति तेनोक्ते । अभ्यर्हयेत् । तत्र विधिः । विष्टरपादा
र्घाचमनीयमधुपर्कान्दद्यात्पीत्तरत्तोगां वधोयपतिष्ठेरन् । अर्हणाकर्मणः । वसिष्ठऋ
षि निचृद्बृहत्युष्णिक्पूर्वं दः । गो दैवता गोरूपस्थाने विनियोगः । अर्हणादुत्तमं मनो । ततो

आसनं लक्ष्मीकान्त निष्ठं जपेत् । वशिष्ठ ऋषिः यजुश्छन्दः विराड्देवता जपे विनियोगः ।
ॐ इदमहमासि । ततो यजमानो विष्टरौ गृहीत्वा विष्टरौ विष्टरावित्यतिरिक्तो प्रतिगृह्येतामि
ति यजमानेनोक्ते वरः प्रतिगृह्णामीत्युक्त्वा तौ गृहीत्वा एकं उदगग्रं आसने निदध्याति । याऽनु
षधीरिति वशिष्ठ ऋषिरनुष्टुप् छन्दः ओषधयो देवता विष्टरासनदाने विनियोगः । याऽनुषधीः
सोमराज्ञीर्बह्वीः शतविचक्षणाः । तासामस्यमासि आसने अच्छिद्राः शर्म यच्छतेति । ततो उपविशे
त् । ततो द्वितीयं पादयोरधस्तादास्तृणीत । वशिष्ठ ऋषिरनुष्टुप् छन्दः ओषधयो देवता पाद
योरधस्ताद्विष्टरदाने विनियोगः । याऽनु षधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु । तासामस्यमा
सि पादयोरच्छिद्राः शर्म यच्छतेति । ततः पाद्यं विष्टरवाससं पादयेत् । वरो गृहीत्वा मे जवल्के(?)
त् । वशिष्ठ ऋषिर्यजुश्छन्दः आपो देवता पाद्योदकप्रक्षालने विनियोगः । यतो देवीः प्रतिपश्याम्या

पस्लतो मा राष्ट्रियाग कृतु। तत्र हृदयं मंत्रं जलेना दाय सव्यंपादं प्रक्षालयेत्। वशिष्ठ ऋषिः त्रि
गायत्री छंदः सव्यपादो देवता सव्यपादप्रक्षालने विनियोगः। सव्यंपादमवनेनिजेऽस्मि
न्राष्ट्रे श्रियं दधे। तथैव दक्षिणं पादं प्रक्षालयेदनेन। वशिष्ठ ऋषिः त्रिगायत्री छंदः द
क्षिणपादो देवता दक्षिणपादप्रक्षालने विनियोगः। दक्षिणंपादमवनेनिजेऽस्मिन्राष्ट्रे
२ श्रियमावेशयामि। तथा पूर्वं तौ युगपत्प्रक्षालयेत्। वशिष्ठ ऋषिः यजुश्छंदः उभयपा २
दौ देवता उभयपादप्रक्षालने विनियोगः। ॐ पूर्वमन्यमपरमन्यमुभौ पादाववनेनिजे
राष्ट्रस्यर्ध्या अभयस्यावरुद्ध्यै। अथाक्षतपुष्पस्त्युदकायुक्तं सयवाक्षमर्घ्यमासाद्य। अर्
घ्यमर्घ्यमर्घ्यमिति वदते। ततो वशी मंत्रवत्स निगृह्णीयात्। तद्यथा। अर्हणाकाशीकस्य पात्रे
णानियमानमंत्रं तोऽञ्जलिगृह्णीयात्। वशिष्ठ ऋषिः यजुश्छन्दः अर्घ्यो देवता अर्घ्यग्रहणे विनियो

ग: । अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासं । ततआचमनीयं शिष्टरवद्गृहीत्वा । वामेन धृत्वाङ्गुष्ठेन मु
खेनोद्धृत्वा आचामेद्दक्षिणेन । वसिष्ठ ऋषिः आचमनीयं देवता आचमने विनियोगः । यशोसि यशो
मयि धेहि सकृन्मंत्रेण । द्विस्तूष्णीं यथोक्तमाचामेत् । अथ मधुपर्कं दधि मधु घृतं [illegible] तत्कांस्यपा
त्रस्थं कांस्येनापिहितं यजमानस्तु करे मधुपर्को मधुपर्को मधुपर्क इति वेदिते वरो मंत्रवत्प्रति
गृह्णीयात् । वसिष्ठ ऋषिः यजुश्छन्दः मधुपर्को देवता मधुपर्कग्रहणे विनियोगः । यशसो यशो
सीति गृहीत्वा वामे निधाय पञ्चकृत्वो दक्षिणपाणि कनिष्ठिकांगुष्ठाभ्यां गृहीत्वा वशिष्ठ ऋषिः ।
यजुश्छन्दः मधुपर्को देवता मधुपर्कप्राशने विनियोगः । यशसो भक्षोसि महसो भक्षोसि श्रियं मयि श्रि-नं
धेहि इति प्रथमां अनेनैवानामिकांगुष्ठाभ्यां द्वितीयं अनेनैव मध्यमांगुष्ठाभ्यां तृतीयं ।
चतुर्थं वकुपिवेत् । शेषमुच्छिष्टमानिने ब्राह्मणाय दद्यात् । द्विराचमनं । अथ नापितो गोरि

ति त्रिर्जपात् । ततोऽर्घ्यः वशिष्ठऋषिः बृहती छंदो गौर्देवता गोमोक्षणे विनियोगः । मुंच
गां वरुणपाशाद्द्विषन्तं मेभिधेहि । तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणानि पिबतूदकमि
ति मोक्षयेत् । अथानुमंत्रयेत् । वशिष्ठऋषिः त्रिष्टुप्छंदः गौर्देवता गोरनुमंत्रणे विनियोगः
ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः । प्रनु वोचं चिकितुषे जनाय
3 मा गामनागामदितिं वधिष्टेति । ततो मधुपर्किकां गां पाद्योदकमाचमनीयमधुपर्कमा ३
त्रं वासो हिरण्यांगुलीयकादिकं तुभ्यमहं संप्रददे इति दद्यात् ॥ इति मधुपर्कविधिः समा
प्तः ॥ ॥ अथ दंपत्योरहतवस्त्रवस्त्रद्वयपरिधानं । ततो मंगलगीतघोषवाद्यपुरस्स
रं ज्ञातिभिः सह स्वगृहं स्थालीपत्नीं चाहयित्वा ब्राह्मणैः सह अवरीस्थाद्वियोनिस्थानं गत्वा
ततः ब्राह्मणं पत्नीं च दक्षिणत उपवेश्य स्वयं च प्राङ्मुख उपविश्याग्निमाहरेत् । तत्र मंत्रः

प्रजापतिर्ऋषिर्गायत्री छंदः अग्निर्देवता अग्निग्रहणे विनियोगः। ॐ अग्न आयाहि वीतये गृणा
णो हव्यदातये। नि होता सत्सि बर्हिषि। ततोग्निं स्थाल्यां गृहीत्वा स्वगृहमागत्य लक्षणं कृत्वा
प्रणयेत्। तद्यथा हस्तमात्रं भूमिं संमार्ज्य नं गोमयोदकेनोपलेपनं। दक्षिणं जान्वाच्य सव्यहस्तं
भूमौ धृत्वा प्राग्वाग्यतः स्थंडिलस्य दक्षिणतः ईशान्यक्रम्य द्वादशांगुलां पूर्वमाभिनीं। प्रागि
दीं यात तच्छलोवर्मी स्व संयव कुशमूलान्यत मेनल्लेखानुल्लिखेत्। ततः स्तद्विस्तातस्याव
दंत्य रत्न्यक्रा परां आदेशमात्री मेड्डीयानू नीलवर्मी रेखान्यत्र द्विस्वितक्रमेणोत्तरेखं गुष्ठा
नामिकाभ्यां गृहीत्वा रक्षि मातिं आम्रदीर्घा निरस्येत्। ततोऽग्निरस्युक्षेत् ततः स्थालीस्थमग्निं
कांस्यपात्रे कृत्वा प्रणयेत्। तेन प्रजापतिर्ऋषिर्बृहती छंदः बृहस्पतिर्देवताऽग्निप्रणयने वि
नियोगः। ॐ भूर्भुवः स्वः प्रणयामि। ततः समिधं क्षिपेत्। ततः सव्यहस्तपुष्पापयेत्। अग्न्याप

रात्रौ दंपत्योरपत्रमथिकं भोजनं। हविष्यान्नाक्षारलवणपर्य्याप्तिभोजनं। तस्मीस्तमितेऽहनि:
पश्चादुपविष्टयोर्दंपत्योर्दक्षिणतः स्थितो ब्रह्मा स्त्रध्रुवारोणीं पश्येत्यपयच्छति। ध्रुवमधरे त्वष्टा
त्र्य पश्येत। अस्मरारीणि यजमाना नायेत्तु मरे त्वष्टा इदं वास्त्रं प्रयोविली इदं नेत्रं इदमञ्जिनं सु
कृष्णादि पाणिं इत्युक्त्वाऽयच्छेत्। ततः अमारितकुल्माजिनोपरिस्थावं उदङ्गृह्याणिपाग्र
५ णि भिन्द्यात्॥ ततो गृहागौ दंपती इति हामस्रुवाणां हित्वा पुण्यकथादिना जागृयान्निशि ओतं वा ४
ग्निं मिथुनकक्षेपेन धारयेतो एतां रात्रिं विहरेया तांच्चाष्टायां रात्रौ तमग्निमुपसमाधाय स्थाली
नादिकं कृत्वा अस्मनुमन्त्र्याप अस्माहत्य उदिते मंथनमाहरेत्। तद्यथा। हालाजिनं घाग्री
वश्चत्वर लोमज मार्थ्यं तदुपरि उदग्ग्रामधराणि निधायतस्यामध्यभागान् मुष्टीक्षिकर्णिक
कां धराञ्जंगुष्ठपर्व्वपरिमाणां शंकुच्छं वक्षोपपृष्ठं हृदयं कां(गु) छत्तुद्दरं एकां मुष्ठाकारं चांगु

ष्ठं वस्ति घ्रंगुष्ठंगुष्ठं वक्तुरंगुष्ठा त्रकृत्स्नंगुष्ठेजं घे एकांगुष्ठो पादेदृत्यवयवा कल्पयित्वा । तत्तु
रत्नात्र घे वो स्राराणि कृत्वा । मूलप्रदेशाद् द्व्यंगुलपर्वसंमितं त्रनं घतष्ट त्यघटितं वज्र मूलो
त्रोतागं स्रवरा रणो मूल देशाद् द्वावंगुष्ठपर्वाणि त्यक्त्वा । अग्र देशाद् द्वादश तदंतराले द्वे वयो ष
निसंज्ञके त्रमंथवुध्नं निधाय यात्रोपरि लोहकीलकं हृदगग्रामो धिलीकृत्वा यजमानेन दृढं
संधारयति पत्नी वसत्वदृ मृखी गप विष्टा वा अमथदेशे नेत्रे त्रिर्वेष्टयित्वा स्मार्थ कृत्वा तावन्मथ्या
तिया वदग्ने कृत्यास्त्रिः । पत्नीयजमानयोरशक्तौ अन्ये विप्राः ऋत्विजो धारयंति मथ्नंति च ।
जाते अग्नौ वरं ददाति स्रुवं कृत्वा । ततः पूर्वोक्तं लक्षणं कृत्वा पूर्ववदग्निं ज्वालयित्वा समिधं क्षिपे
तु । ततोग्नेर्दक्षिणतोग्रेणाग्निं परिक्रम्य जलासनोपरि यजमानोदर्भानंग्राग्ना नाल
स्तीत । ततोग्नेः पश्चात् प्राग्मोसनतः आहूमुखव्यपविष्टं ज्वालाणीहणीति । तद्यथा । यथाशक्ति

नां तूलादीनामन्यतमं पूर्वाकृतिकर्मणा दंपश्चात् तत्रैवं ब्रह्मासनं । भवामीत्युक्त्वा ब्रह्माणु
णानि परिक्रम्य स्वासनं ब्रह्मासनात्तृणं इ॰ स्वलिष्टं मध्यमपर्णाभ्यां अंगुष्ठेनोपकनिष्ठिकया
वांगुल्या आसनात्तृणमभिसंगृह्य नैर्ऋत्यां दिशि निक्षिपेत् । अनेन मन्त्रेणापानि स्पर्शी ऋषिर्वसुः
परावसुर्दैवता दर्भनिरसने विनियोगः । निरस्तः परावसुरिति । ततो वामेन आसनमव
5 जानुं दक्षिणेन । अपउपस्पृश्योदंङ्मुख उपविशत्यनेन । वसिष्ठर्षिर्बियद्बु । आवसुर्दे ५
वता उपवेशने विनियोगः । आवसोः सदने सीदामीत्यग्न्यभिमुखोपविश्य यज्ञियां वाचं नियम्य वा
ग्यतः प्रांजलिः कर्मपर्यन्तमासीत । यद्यज्ञीयमंत्रमाषणे वैष्णवीमृचं यजुर्वा जपेत । ततो
ऽग्निमुत्तरतः पात्रासादनार्थं प्रागग्रान् दर्भानास्तृणीत । तत्र पात्राण्यासादयेत । कुशाद्वयं पवित्र
निइक्ष आज्यस्थाली स्रुवा स्रुवसंमार्गकुशा उपयमनकुशाः समिद्द्वयं पूर्णपात्रमासादयेत

गांवासमीत्रोपकल्पयेत । तत आचाराहस्तगृहीतोदकं वमसेति क्षिप्यासादितकुशान्नादाय
वमसीदकेन पात्राणि प्रोक्षेत । ततः पश्चादग्नेर्दक्षिणेन गोस्थात्माभिमुखो न्यूब्जौ पाणी प्रा
निधाय जपं करोत्यनेन । परमेष्ठी ऋषिरनुष्टुप् छन्दो भूमिर्देवता जपे विनियोगः । इदं भू
मेर्भजामह इदं भद्रं सुमंगलं । परासपत्नान् बाधस्वान्येषां विंदते धनं । राजो वेत । विंदतो ध
सुदर्शन विशेषः । ततः कृतान्जलीगृहीतासंप्रदाय कुशान्नादाय । आदक्षिणेन वितनम
नीमेकीकुर्वन् जपेत । इमं स्तोममिति त्रिचस्य कौत्स ऋषिर्जगतीछन्दोग्निर्देवता परिसमूहने
विनियोगः । ॐ इमं स्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया । भद्रा हि नः प्रम
तिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव । तरामि अंकुरणा वामहृ वीषि ते क्षितयं ततः पर्यण

पर्वणावयं । उदीचामवेपतरां साधया धियेमेनस्सख्येमा रिषामा वयं तव । मावो मनस्वामनि धंसा
क्षया धियस्वै देवाह विरद्दं त्वाकृतं । वमा हित्वां आवहता त्युग्रमस्यग्ने सख्येमा रिषामाव
यं तव । अथ मा हित तव हिः स्तत्रैव पंचधाकुर्यात । तत्र प्रथमं भागं दक्षिणे सामाप्रायसख्ये
6 कृत्वा तस्मादेव तृतीय भागं गृहीत्वा अग्नेः पुरस्तात् दक्षिणा संस्थस्तृणीत । ततस्तत्कृत्वा ·
द्वायस्तृतीयं मूलानि जाहयत । तत्रैव स्तृणीत ततो मूमिस्थ द्वितीय भागमादायस्तस्ये उ ६
त्तिष्ठायसख्यस्तं दक्षिणे नादाय तृतीयं मूलानि जाहयतस्तृणीत । एवं दक्षिणात उत्त
रतः पश्चात्स्विष्टिणापं चम भागरहितं स्तृणीत । तत इध्मा नादाय तूष्णीं मग्नौ प्रक्षिपेत । इ
नावक्षिप्राद्वर्हिर्मस्ततः इध्म मादाय । ॐ उपधीमं तद्वीयतस स्त्यापरः इति ताप क्षिपेत् । हि नहि ।

अनेन प्रजापतिर्ऋषिः यजुः पवित्रे देवता पवित्रछेदने विनियोगः । ॐ पवित्रे स्थो वैष्ण
व्यौ । ततः पवित्रे समसोदकेन प्रोक्षेदनेन । प्रजापतिर्ऋषिः यजुः पवित्रे देवता पवित्र
प्रोक्षणे विनियोगः । विष्णोर्मनसा पूते स्थः । ततः आज्यस्थाल्यामुपस्थाप्य दग्ने वेहिर्विनि
तायां उदगग्रपवित्रां निहितायां आज्यं निक्षिप्य ते पवित्रे उभाभ्यां पाणिभ्यां अंगुष्ठाभ्यामुद

पवित्र

गग्रे विरले गृहीत्वाज्यमित्युना प्रजापतिर्ऋषिः गायत्री छंदः सविता देवता आज्योत्पव
ने विनियोगः । ॐ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः इति । स
कृद्द्विस्तूष्णीं ततः पवित्रे [illegible] तूष्णीमग्नौ क्षिपेत् । आज्यस्थालीमग्नावधिश्रित्य विलोक्योद
गुद्वासयेत् ततो बर्हिषि स्थालीपाकपश्चे स्थालीपाकपुरस्तादासादयेत् । ततः स्रुक्स्रुव

दायस्थालीपाकप होमं कुर्यां वसन्ते कन्यामेमागिकुशैः संमार्ज्य तत्परसंस्कृतकदक्षि
णतो निदध्यात् । आऽयमानेः पश्चिमत आसादयेत् । वसन्ते दाऽयस्यास्थ्याः पूर्वस्यां दिशि
वसन्तस्थालीमासादयेत् । तत स्रुवमादित समिद्धं पश्चादुदग्दिशि निदध्यात् । उदकांजलिं
7 यासिंचेत् । प्रजापतिर्ऋषिः त्रिष्टुप् अदितिर्देवता अंजलिप्रसेचने विनियोगः । अदिते
ऽनुमन्यस्वेति दक्षिणतः । प्रजापतिर्ऋषिर्यजुरनुमतिर्देवता अंजलिप्रसेचने विनियो ७
गः । अनुमतेऽनुमन्यस्वेति पश्चात् । प्रजापतिर्ऋषिर्यजुः सरस्वती देवता अंजलित्यागे
विनियोगः । सरस्वत्यनुमन्यस्वेत्युत्तरतः । प्रजापतिर्ऋषिः त्रिष्टुप् छन्दः सविता देवता प
र्युक्षणे विनियोगः । ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गंधर्वः केतपू

केतनः पुनात्तु वायुस्तृप्तिर्वीर्यं नः स्वदन्तु। इति हव्यद्रव्यसहितं पर्युक्ष्य तस्य रुद्राग्निर्वी
र्य इध्मसमित्युत्थाप्य स्रुवं गृहीत्वा। वशिष्ठ ऋषिः कालाग्निरुद्रो देवता जपे वैरूपाक्षं जपे वि
नियोगः। आसं नियम्य। तपश्चेत्यारभ्य वैरूपाक्षं तेजश्चान्तेन ॥ ॥ तपश्च तेजश्च श्रद्ध
ा च ह्रीश्च सत्यं चाक्रोधश्च त्यागश्च धृतिश्च धर्मश्च सत्त्वं च वाक्च मनश्चात्मा च ब्रह्म च
तानि प्रपद्ये तानि मामवन्तु भूर्भुवः स्वरों महान्तमात्मानं प्रपद्ये। विरूपाक्षोऽसि दन्ताञ्जिस्त
स्य ते शय्या पर्णे गृहा अन्तरिक्षे विमितं हिरण्मयं तद्देवानां हृदयान्ययस्मये कुम्भे अन्तः संनि
हितानि तांस्तरैका मश्रेणा यच्छेन याज्ञविद्वा पुनर्नमश्चर्य्यमुपयेनिर्वर्द्देवेभ्यः श्राम्णाणास्य
हं मनुष्येभ्यो ब्रह्मणो वैश्वानराणमुपधाव त्युपचावाधावामि ज्ञपन्तं मामा हानि सापी जेंकन्तं मा
निबलभृच्च बलसाच्च रक्षतोऽप्रमणी अनिमिषतः सत्यं यत्ते द्वादश पुत्रास्ते त्वा संवत्

माऽग्निहोत्री कुर्वतं मा मा प्रतिकार्षीः । त्वां प्रपद्ये वयाघस्मृत दुदं कर्म करिष्यामि तन्मे राध
यतां तन्मे समृध्यतां तन्मे उपपद्यतां समुद्रो मा विश्वव्यचा ब्रह्मानुजानातु तुथो मा विश्व
वेदा ब्रह्मणः पुत्रोऽनुजानातु श्वात्रो मा प्रचेता मैत्रावरुणोऽनुजानातु तस्मै विहृणा स्वाय
दं मां यज्ञे समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय
ब्रह्मणः पुत्राय नमः ॥ ॥ इत्थं तेन ब्रह्म दक्षिणं हस्ते नाभिं पाशि क्रम्य हस्तस्या ह तु
पृष्ठे ब्रह्माणं संपूज्य तेनैव मार्गेणास्तसमिद्धं हस्तमानीय समिधमग्नौ क्षिपेत् । ततो
ऽग्न्याग्न्यागले तिवद्विमाहृत्यीत । स्रुवेणो पस्तव्यामाहतित्रय होमं कुर्यात् । तद्यथा भू
रिति प्रजापतिर्ऋषिर्गायत्री छंदो ऽग्निर्देवता होमे विनियोगः । ॐ भूः स्वाहा । भुवर्भुवरिति

8

प्रजापतिरृषिरनुष्टुप् छन्दो वायुर्देवता होमे विनियोगः। ॐ भुवः स्वाहा। स्वरिति प्रजाप
तिरृषिरनुष्टुप् छन्दः सूर्यो देवता होमे विनियोगः। स्वः स्वाहा। त्रिगृहीतमाज्यं स्रुचि गृ
हीत्वा चतुर्थेऽहनि स्रुवं पूर्णस्रुचि विनिधाय तमन्येनाज्येन स्रावयेद्यावत्पूर्णा स्रुक्। पू
र्णोपयमनेत्यं आज्ञप्ता। स्वस्ति वाच्य यथाशक्ति तांबूलादिकं दत्वा ब्राह्मणैर्गृहेः पुरस्ता
दुपविष्टैः स्वस्तीत्युक्तो यत्नात्त्याग्रस्रुवः प्रजापतये इति मनसानुद्रुत्य स्वाहाकारान्ते वा
जुहुयात्। इदं प्रजापतये इति त्यागः। अग्र प्रजास्रावेण व्याहृति चतुष्टयेन आज्येन जु
हुयात्। छन्दऋषिदैवतं पूर्ववत्। ततो यजमानः स्रावेण व्याहृतित्रयेण जुहुयात्। ततः
समिधमाधाय पूर्ववत्पर्युक्ष्य पूर्ववद्दंडजलानुप्रसिंचेत। अत्र मंत्रं स्यादिति मंत्रविशेषः

ततः अस्तृतवर्हिमाद्दाय पश्चाद्व्यस्थाल्यां । अग्रमध्यमूलक्रमेण त्रिस्त्रिमर्ज्जयेत् मंत्रावृ
त्या । प्रजापतिऋषिर्यजुः वर्हिर्द्देवता वर्हिरंजने विनियोगः । अक्तं रिहाणा व्यंतु व
य इति । ततः यमसोदकेन ओद्ध्यमग्नौ प्रक्षिपेदनेन । वशिष्ठऋषिरनुष्टुप्छंदो रुद्रो
१ देवता वर्हिर्होमे विनियोगः । ॐ यः पशूनामधिपती रुद्रस्तंतिचरो वृषा पशूनस्मा
कं माहिंसीरेतदस्तु हुतं तव स्वाहा । आघस्त्रुवेण अविछिन्नधारया पूर्णाहुतिं जुहुयाद १
नेन । प्रजापतिऋषिर्यजुः वसुर्द्देवता होमे विनियोगः । ॐ वसुभ्यः स्वाहा । ततः पूर्णपा
त्रे हविःशेषं गां वाससमीप एतदाधानकर्मदक्षिणां ब्राह्मणेभ्यः मह्यं संप्रददे । इति दक्षि
णां दद्यात् । दंपत्योः परिधानवस्त्राणि च दद्यात् । अथ प्रदक्षिणमग्निं परिक्रम्य ब्रह्मा णमु

स्थाप्यते नैव स्थ्वा। सन्नमाराध्योपविश्य पुनः प्रदक्षिणां कृत्वोपविश्य वसमन्तिनीय पुरः पू-
यित्वा भूमौ निधाय रक्षावंदनं कुर्यात्। प्रजापतिरृषिः पथ्याः पंक्तिश्छंदः। जमदग्न्यादयो
देवता। आयुःकामार्थे रक्षावंदने विनियोगः। आयुषं जमदग्नेरिति शिरसि। कश्यपस्य
त्र्यायुषं ललाटे। अगस्त्यस्य त्र्यायुषं इति कंठे। यद्देवानां त्र्यायुषमिति दक्षिणांसे। तन्नो अ-
स्तु त्र्यायुषं वामांसे इति। ततो वह्निं प्रार्थयते कृतांजलिः। आयुरारोग्यमैश्वर्यं धीधृतिः शं
बलं यशः। ओजो वर्चः पशून् वीर्यं ब्रह्म ब्राह्मण्यमेव च। सौभाग्यं कर्मसिद्धिं च कुलज्यैष्ठ्यं सु-
कर्तृतां। सर्वमेतत्सर्वसाक्षिन् द्रविणोदा रिरीहि णः। वामदेव्यगानं। त्र्यधिकं शत-
ब्राह्मणान् यथाशक्ति भोजयेत्॥ ॥ अथ वैश्वदेवपद्धतिः॥ ॥ सिद्धे पाके स्थावं

10

तो यजमानो ऽग्निशालायां प्रविश्य भूतमसि निक्रहीति जेषे पत्नीं वाचयेत् । भूतमसि ति
पत्नीं ब्रूयात् । ततः ऊर्जमित्युद्देस्मस्मे नमस्तन्मा हाड् इत्युपांशु यजमानो ब्रूयात् । ततो
गृह्यादि समिदाधानान्ते पावकाग्निमावाह्य तज्जुह्यम न्नहस्तेन द्वादशपर्व्वपूरिक
मादाय प्रजापतये स्वाहेति मध्ये जुहुयात् । अग्नये स्विष्टकृते स्वाहेति द्वितीयमपरा
जितायां दिशि । इदं प्रजापतये । इदमग्नये स्विष्टकृते त्यागद्वयं । समिदाधानादि पश्चि
शेषनीते वलीन्हरेद्यथा । पृथिव्यै नमः । वायवे नमः । विश्वेभ्यो देवेभ्यो नमः । प्रजा
पतये नमः । ततो वस्त्रपरिस्रुतोदकधारां दद्यात् । तदनन्तरं दर्व्यां प्रक्षिप्य अद्भ्यो नमः इ
ति वलिं दद्यात्पुनरुदकेनाभिषिंचेत् । ततस्तेनैव विधिना । ओषधिवनस्पतिभ्यो नमः । १०

धा

आकाशाय नमः। कामाय नम इति दद्यात्। अंघोवलीन्। तद्बहिरतः उन्नयतोऽद्भिः परिषिक
पूर्वनम्नवे नमः। इन्द्राय नमः। वासुकये नमः। ब्रह्मणे नमः। इति वर्णोवलीन् द
द्यात्। ततो मण्डलाद्वायव्यां दिशि। रक्षोजनेभ्यो नम इति। अथ बलिशेषमन्नमुदकेनाभ्य
सिंच्य। अपसव्येन पितृतीर्थेन सर्वबलीनां दक्षिणतः पितृभ्यः स्वधा इति दद्यात्। अथ
यिणानि नयन न पूरणा वामदेव्यगानान्तं अदद्यात् वायव्यबलिः। सायंप्रातर्होमपद्धतिः॥
अनस्तमिते जातुकर्ण्णां। सन्ध्यामुपास्याग्नेः पश्चात् क्रियतान्यं वकारणे। दूर्वी परिस
मूहनपरिस्तरण पर्युक्षणसमिदाधानादिकं वामदेवनामाग्निमावाह्य द्वादशपर्वपूर्णि का
माहुतिं पाणिनाग्नये स्वाहेति जुहुयात् प्रजापतये इति मनसा जुहुत्यनथैव अपरा

सितायां दिशि द्वितीयायां कुर्यात् । इदमग्नये । इदं प्रजापतय इति त्यागः । समि
दाधानपर्युक्षणपरिषेचनवर्ज्जं प्रणीताकरणावमर्शनिनयनं हुतप्रतिष्ठापनं स्रु
वंदनवत् प्रार्थनं वामदेव्यगानानि कुर्यात् । प्रातर्होमे सूर्याय स्वाहेति प्रथमाहु
तिमंत्रविशेषः । सायंहोमे हुतमित्यादि वैश्वदेवबलिं दत्त्वा मध्याह्ने अन्यस्सर्वं ११
समानं ॥ ॥ इत्यारणिपक्षे आधानपद्धतिः ॥ ॥ पूर्वं वयोनिं पूर्वाहिते नराधान
कर्मणि । विशेषोऽस्त्युपस्थानमात्रं तु प्रकृत्यैकं तथा । कृत्वा व्याहृतिहोमांस्तत्र प्रति
ष्ठितपावकं । अथ्यामेकेवलाग्नेयः क्रुध्यो सामीरमानसः । अग्निमीळे अग्न आयाहि अग्न आ
याहि वीतये इति स्तोत्रिन्नीतिरग्निं दूतमग्नेमृळेति च । इत्यष्टावाहुतीर्हुत्वा यथाविध्य

नुपर्युक्ष्य पूर्णाहुत्यादिकं सर्वमन्यत्पूर्ववदाचरेत् । अग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्यो-
तिर्ज्योतिरिन्द्रः । सूर्यो ज्योतिर्ज्योतिः सूर्यः । पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा पुनर्नः
पाह्यंहसः । सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि । अग्नेह
उ महा॰ अस्य यज्ञस्य देवयुञ्जनं इध्मस्य बर्हिरासदं । अपिवाज्ञातं यदनाज्ञातं यज्ञस्य
क्रियते मिथ्वग्ने तदस्य कल्पय त्वं हि वेत्थ यथायथं स्वाहेति ॥ ॥ अथ पौर्णमासी
स्थालीपाक इति ॥ ॥ पौर्णमास्यां प्रातराहुतिं हुत्वा शालां पर्युपवेशयेत् । अष्टा
दशोक्षानादाय । अग्निमन्वारभते उपकल्पयेत् । अपराह्णे अपवत्सधिकं भुञ्जीत । अथ
प्रतिपदि प्रातर्होमं कृत्वा पौर्णमासेनाहं यक्ष्ये इति कृत्वा उपवेशनान्तं पूर्ववदाहरि

ग्मसमिश्रं मार्गिकुशास्कंधं पूर्णपात्राणि आज्याममास्ताद्यं दक्षिणेनैः पश्चिमतः स्थितादमोपि
शि । उलूखलमुसलसह हविः शूर्पकंसानामासाद्यो लूखलौ द्वि पूर्णपात्रं क्षेनेऽग्नेरेव
ततः शूर्पोद्धविर्मुष्ट्या कंसे कृत्वा आनयित्वाङ्गुष्ठं निर्वपामीति उलूखले मक्त्वा नि
र्वपेत । तथैव द्विस्तूष्णीं शेषं शूर्पेणैव क्षिपेत । ततो दक्षिणोत्तराभ्यां पाणिभ्यां मुसल
मादाय प्राङ्मुखोपविष्टः सम्यग्वैष्टेयोहेद्यावद्धन्यात । ततः शूर्पे कृत्वा निःपूय ए
वं त्रिः परमव हनननिः पवना निकृत्वा कंसे कृत्वा त्रिः प्रक्षाल्य स्थाल्यां आगम पवि
त्रं तर्हि ताभ्यां प्रक्षिप्य उदकं चाग्नावधिश्रित्य मेक्षणेन प्रदक्षिणं चालनं श्रपयेत ।
सुशृतं चरुमभिघारयेत । ततः स्रुवेण आसादितान्येनाभिघार्य उदगुद्वास्य तथैव प्रज्ञा

12 १२

भिघारयेत् । ततो मूलपादि विरूपाक्षांतं कृत्वा माहस्म नामगेन्द्र हा गच्छेत् त्वा वा स्व व
र्तुगृहीतमाज्यं स्नुचि कृत्वा पंचगृहीतेन तु पंचावत्तिनो । अवलिते ध्रौव्रमरमा मे आज्या
धारयाग्नये स्वाहेति जुहुयात् । पुनस्तथैवाज्यं गृहीत्वा सोमाय स्वाहेति दक्षिणातः
स्तथैव जुहुयात् । ततः स्नुच्युपस्तीर्य मेक्षणेन मध्यात् द्ववधाय स्नुचि हिता पुनस्तथैव पू
र्वार्धात् द्ववधाय पंचावत्तिनां तु तथैव पश्चार्द्धात् तृतीयं पुनः प्रत्युपस्तीर्य अवदानस्या
नाच्य मध्य अग्नये स्वाहेति मध्ये जुहुयात् । माकृत्वा त्रिर्वा । अथ जपान्पूर्णाहुतिवत्
जायाश्चिष्टं जुहुयात् । ततः स्विष्टकृदर्थं स्नुच्युपस्तीर्य उत्तरार्द्ध पूर्वार्द्धात् स्विष्टमेक्षणे
नावदाय । पुनर्हविः प्रत्युपस्तीर्य ततो आज्यं गं कृत्वा अग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्ध पू

वीर्द्धिकुर्यात् । आग्नेरीशानप्रदेशे पंचाशत्त्रीनांतु द्विरूपलगाणां । मज्जद धारणासमान
मन्वत । ततः पूर्णाहुतिवत्प्राहुतित्रयहोमं कृत्वा मेक्षणमग्नौ प्रहरेत् । दर्भपिंडपदे
तु नाग्नौ प्रक्षेपः किं तु भोजनकाले मेक्षणं प्रक्षाल्यते नैव स्थालीपाकशेषमुद्धृत्य
13 भुंजीत । ततोग्नौ प्रहरेत् । ततः समिदाधानादि चमसपूरणं तं कृत्वा पूर्णपात्रं दक्षि १२
णे पंचोद्धृत्य ब्रह्मणो दत्वा ब्राह्मणेभ्यो भोजनं दानं कल्पयथाशक्ति दक्षिणां ब्रह्मणो
दत्वा वामदेव्यं गीत्वा समापयेत् ॥ ॥ दर्शयागोप्येवमेव निर्द्देशः ॥ ॥ अथ श्रवणा
कर्मपद्धतिः ॥ श्रावण्यां पौर्णमास्यां श्रवणाकर्म । शालाया अग्रतः श्रवणाकर्मा
र्थं पूर्वमंडलं पंचवर्णधारात्रिवारकं परिकल्प्य । तन्मध्ये स्थंडिलं चतुरस्रं चतुरंगु

लोच्छिन्नं हस्तमात्रं द्वावास्यं डिलात्प्रागग्रा दक्षिणतश्चोत्तरतश्च द्विः कृत्वाधिकुम्भं सकृत्पत्रत्रय
परिमितं प्रादेशं त्यक्त्वा प्रादेशमात्राणि वर्तुलानि चतुरंगुलोच्छिन्नानि मंडलानि य
ज्ञिकल्पयोः समास्यांशान्तराङ्कुतिं कृत्वा अथ मन्त्रयोगेमारु पृषाणुदृषिके विधाय तस्मिं
स्थंडिले उपलिप्ते लक्षणपूर्वकं शालाग्नेरेकदेशमग्निं प्रणयेत् । अग्नेः पश्चिमतः
स्तरदर्भेषु परिउलूखलमुसलयवशूर्पचमसकपालानि संहृत्याग्नौ कपालं स्था
पयसकृत्संगृहीतं यवमुष्टिं शूर्पे निक्षिप्य परि अवहननमर्कं थित्वा उलूखले निक्षिप्य दक्षिणो
त्तरपाणिभ्यां मुसलमादाय उद्धृत्योद्धृत्यावहन्यात् । यावत्सिद्धाः सकृद्वो भवंति । ततः शू
र्पेन यवमसे निक्षिप्य शूर्पेणापिधाय दक्षिणपश्चिमे वलिहरणस्थाने नरेन निक्रम्या

ग्निशालायां निदध्याति । अतिवाहितान्नेरिंधनसंदोहैस्तोधाराणां यावद्बलिकर्म्मार्थं मं
डलान्पश्चिमकोणकाष्ठपात्रेतनयानशरावादिपात्रैः पिधारयेत । अथास्मिन्नित्येसम
येसंध्यांकृत्वासमस्तकुचमसे मूर्धिहकपाणिगृहीत्वा अतिथिगणितसमीपसंचरेणा
15 गत्य अग्नेः पश्चादुपविश्य अग्नेरुत्तरतश्चामादयति । ततः शूर्पेशाकुंप्रक्षिप्य चमसे १४
उदकं प्रक्षिप्य सव्यहस्तेन गृहीत्वा शाकुपृष्ठे दर्वीं गृहीत्वा सव्येन वा दक्षिणेन चमसमादा
यदक्षिणां संचरेणाग्निः आग्नेयपश्चिमोत्तरमंडलयोर्वहिर्ग्वाउपत्तिस्त पूर्वमंडलस्य
पश्चात्साङ्गुष्ठेनउपविश्य चमसंभूमौ निधाय दक्षिणहस्तेन चमसादुदकं गृहीत्वा
मंडलेनिक्षिप्य दक्षिणहस्ते नदर्वीमादाय बलिंदद्यात्यनेन । वशिष्ठसपिः यनुक्तं

दः सर्पराजो देवता बलिदाने विनियोगः ॥ यः प्राच्यां दिशि सर्पराज एष ते बलिः । त
तस्य नमसोदकं बलिसमीपे निनयति । बलिमनु अवनयत । अथ दर्वीं चमसं गृहीत्वाऽप्र
दक्षिणं तेनैवागत्य संचरेण प्रविश्य अग्नेः पश्चादुपविश्य चमसदर्व्यौ प्रगृह्य पदस्य उपस
तपस्य । पूर्ववत् मंडले पूर्ववद्बलिं दद्यादनेन । यो दक्षिणस्यां दिशि सर्पराज एष ते बलिः
ततः अप्रदक्षिणमाहृत्य चमसदर्व्यौ पूर्ववदन्यस्य ए तथा । चमसे उदकं दर्वीम् प्रक्षुन्ना गृही
त्वा अप्रदक्षिणमाहृत्य अग्नेः पश्चादुपविश्य चमसदर्व्यौ संस्कृत्य पूर्ववद्गृहीत्वा अप्रदक्षिण
माहृत्य उत्तरमंडलाद्दक्षिणत उदङ्मुखोपविश्य पूर्ववद्बलिं दद्यादनेन । यः उदीच्यां
दिशि सर्पराज एष ते बलिः । ततः अप्रदक्षिणमाहृत्य । अग्नेः पश्चात्प्राङ्मुख उपविश्य च

ममद्दर्वीं संस्कृत्य शान्तुशेषं शूर्पेणैवाग्नौ हुत्वा । सेवरोणा संस्कृत्य शालाग्नेः पश्चात्प्राङ्मु
खोपविश्य दक्षिणोत्तरौ पाणी न्यंचौ भूमौ निधाय अन्तर्मन्त्रं जपेत् । वसिष्ठऋषिः भूरिगनु
ष्टुप्छन्दः पृथिवी देवता जपे विनियोगः । ॐ नमः पृथिव्यै दंष्ट्राय विश्वभृन्माते अन्ते रि
षाम संहतेमा विवधीर्विहतं मा भिसंवधीः । अतः परं प्रतिप्रणीतस्याग्नेर्लौकिकत्वं । अथ १५
सायमाहुतिं वैश्वदेवं च कृत्वा । पायसस्थाली पाकमारभेत । प्रतिपर्ववत् यो विशेषः स उ
च्यते । उदकानन्तरं चरुश्रपणार्थं पयस्त्रासादयेत । हविस्थाने अष्टमुष्टिपरिमितान् तंदु
लान् आसादयेत । निर्वापे अवर्णाय चतुर्मुष्टि निर्वापानि इति सव्वा वा । एवं विष्णवे वा । अग्नये प्र
जापतये चेति मनसा विश्वेभ्यो देवेभ्यश्चेति सकृत्कृत्स्नं कान्यं चतुष्टि त्रिरुक्तं येणानुत्सीद्धिरस्तु निर्वपेत् ।

एवं निर्वापस्थाल्यामुदकमप्रक्षेपस्थानेऽप्यगः प्रक्षेप आज्यभागांतं कृत्वा । अवदानधर्मे
ण स्थालीपाकस्य पंचाहुतीर्जुहुयात् । तद्यथा । ॐ श्रवणाय स्वाहा । ॐ विष्णवे स्वाहा । ॐ
अग्नये स्वाहा । ॐ प्रजापतये स्वाहा । ॐ विश्वेभ्यो देवेभ्यः स्वाहा । ततः प्रायश्चित्तादि तंत्र
समाप्तिं कुर्यात् । ततः अग्नेरुत्तरतो धृतमृत्पिंडोपरि हरिते वृक्षपत्रं समूलं कुशं विन्य
प्रतिष्ठाप्य प्राङ्मुखो गंधपुष्पधूपदीपनैवेद्यवस्त्रतांबूलादीनिरभ्यर्च्य कृतांजलिमं
त्रद्वयं जपेत् । वसिष्ठ ऋषिः त्रिष्टुप्छंदः सोमो देवता जपे विनियोगः । ॐ सोमो राजा सोमस्त
थो राजा सोमोऽस्माकं राजा सोमस्य वयं स्मः । अहिर्मंडोऽनमसि सोमस्त्वं वः सोमस्त्वं ब्रह्महिंडां न
नमसि । वसिष्ठ ऋषिः त्रिष्टुप्छंदः सूर्यो देवता जपे विनियोगः । ॐ यांः सद्या समधत्तब्र

यः स्वजनऋषिभिः सह। तांस्पृमात्यकानिष्ट नमो वो अस्तु मानो हींमिति ह। ततो वामदेव्यगा
ने ब्राह्मणभोजनं सकलं कुर्यात्॥ इति श्रवणाकर्म॥ ॥ अथ प्रत्यहबलिहरणप्र
योगः। ततो श्वः पौर्णमासयागं कृत्वा शालाग्नौ कपालमाधाय प्रत्यहबलिहरणार्थं वहु
16 सक्तु कारयित्वा। नवेष्टन्मयपात्रे स्थितान् नवकपालिकया पिधाय शालैकदेशे निदध्यात् १६
ततः सायं संध्यां कृत्वा होमान्तो आकुशालाग्नेः सकाशात्तु स्त्रुकमात्राय प्रतिप्रणीतस्थाने लक्ष
णमकृत्वा स्थाप्य ससक्तु चमसदर्वीं शूर्पं दयागा एया द्वारमेव प्रविश्य वाग्यतः पूर्ववद्ब
लिहरणं कुर्यात्। सक्तुशेषहोमवर्ज्जं। शेषशक्तु भांडे निक्षिपेत्। इत्नीप्रत्यहबलिहरणमि
त्येके। माधकारस्तु मंत्रवदेवेति। नमः पृथिव्या इति मंत्रजपवर्ज्जं। ॐ इर्वं आग्रहायणीपर्य्य

तं बलिहरणं स्वयमेव कुर्यात् ॥ ॥ अथ एकाष्टका कर्म्मपद्धतिः ॥ ॥ तत्र प्रौष्ठप
द्यानुर्ध्वं कृष्णाष्टम्यां भवति । तत्र प्रथमप्रयोगे मातृपूजाभ्युदयिके न स्यातां । नाष्टकासु
भवेन वृद्धमिति वचनात् । अग्नेः पर्वेणा नादिनान्तदेवयागानान्ते विशेषः । इन्द्राग्निभ्यां त्वा जुष्टं
निर्वपामीति निर्वापः । ततः आज्यभागान्ते एकाष्टकेति मन्त्रेण प्रधानहोमः । वसिष्ठ ऋषिः
निचृदनुष्टुप्छन्दः इन्द्राणी देवता होमे विनियोगः । एकाष्टका तपसा तप्यमाना यज्ञा गर्भं
महिमानमिन्द्रं । तेन देवा असहन्त शत्रून् हन्ता सुराणामभवच्छचीभिः स्वाहा । अथ स्विष्टकृद्धो
मादि वामदेव्यगानान्तं तन्त्रं समाप्य अन्वाहार्यश्राद्धं कुर्यात् ॥ ॥ इत्येकाष्टकाप
द्धतिः ॥ ॥ अथाश्वयुजीकर्म्मपद्धतिः ॥ ॥ आश्वयुज्यां पौर्णमास्यां जातराहुतिं जुहुया

प्रथमप्रयोगे मातृपूजाभ्युदयिके विधाय पायसस्थालीपाकमारभेत् । तत्र ब्रह्मोपवेश
नाद्याज्यभागान्ते विशेषः । आमादनकाले उदकानन्तरं पयः चरुः श्रपणार्थमासादये
17 त् । उत्तरतः एषां तण्डुलं उपकल्पयेत् । तत्र पयसि सृतं तस्य पाकः भवति । यथोपदास्यसंपुर
तन्दुलानामुच्यत इति वचनात् । निर्वापस्थाने रुद्राय त्वा जुष्टं निर्वपामीति निर्वापः
ततः आज्यभागान्ते पायसेनाज्ञातहृदयमवदानधर्मेण जुहुयात् । तद्यथा प्रजापतिरृ १७
षिः निचृद्गायत्रीछन्दः रुद्रो देवता होमे विनियोगः । ॐ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्ष
तं मध्वा रजांसि सुक्रतू स्वाहा । वसिष्ठ ऋषिः विराड्जगतीछन्दः रुद्रो देवता वरुणहोमे
विनियोगः । ॐ मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो

रुद्र मा मि नो वधीर्हिंसिष्टं तः स हमि त्वा हवामहे स्वाहा । इदं तु इन्द्राय इति द्वयोस्त्यागं कु
र्यात् । ततः स्रुवेणात पदत्यापदत्यगोताम मिरष्टमि राज्याहुतीर्जुहुयात् । तद्यथा ।
कामो ऽसि स्वाहा । प्रियासि स्वाहा । हव्यासि स्वाहा । इडासि स्वाहा । रन्ते स्वाहा । सरस्व
विश्रुते स्वाहा ४ ती स्वाहा । महि स्वाहा । इति प्रायश्चित्तहोमादि समस्तनिनयनांतं विधिं समाप्य येन त । अ
श्व आसादितं पृषातकं अग्नेः पश्चिमेन पर्यणीय ब्राह्मणेन वेक्षयित्वा स्वयमवेक्ष
। अनेन प्रजापतिर्ऋषिः । निचृद्बृहती छंदः । अग्निर्देवता पृषातकावेक्षणे विनियोगः ।
त॰ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतमिति । अ

वेक्षणे ब्राह्मणा[...]मयवै मे मंत्रः। ब्राह्मणामावश्यमवेक्षेन। अथ एषा तत्कं यत्नेनि
धाय ब्राह्मणेभ्यो यथाशक्ति तां दत्त्वा हि दत्वा स्वस्ति मं वं तोऽक्रवेद्विति वाचयनां स्वस्तीति
ते कृत्वे वामदेव्यं गायेत्। ततो ब्राह्मणान्भोजयित्वा स्वयं भुक्त्वा लोक्षा मयस्त्रौ षधिगर्भी
न्मा मणीन्स्वयं पुत्रां अश्वमा त्र पुत्रादयश्च बाहौ वध्नीत्। बालानां तु ग्रीवासु स्वस्त्ययनार्थ
मिति मौलिपा बेधस्यापि कारणेपि दोषो नास्ति ततः सायं होमं वैश्वदेवानंतरं गावयष्टा
तकं गाथा यित्वा ब्राह्मणानां पूर्ववत् स्वस्ति वाच्य तां रात्रिं गां सह वत्सेन वासयेत्॥ ॥ इ
त्याश्वयुजीकर्मपद्धतिः॥ ॥ ते आश्वयुजामेव क्रियते॥ अथाग्रहायणी पद्धतिः॥

तत्र श्री स्वयुडीकर्मेष्टापानकावेक्षणां तेकत्वा आग्रयणामिमितं मात्रपूजाभ्युदयिकं वि
धाय पाय सस्थालीपाकमारभेत् । तत्रब्रह्मोपवेशनादि वामदेव्यगानांते यो विशेषः ।
सोत्र लिख्यते । इंद्राग्नीभ्यां जुष्टं निर्वपामीति निर्वापः । पयसां श्रपणं आज्यभागांते श्र
वदानधर्मेण जुहुयात् । ॐ इंद्राग्निभ्यां स्वाहेति मंत्रेण इदमिंद्राग्निभ्यामिति त्यागः । ततः
स्रुवेणोपहत्य आज्याहुतिवत् हस्तेन जुहुयायेंत् । तद्यथा । वसिष्ठ ऋषिः विराट् — ष्टु
प्छंदः इंद्रो देवता आज्यहोमे विनियोगः । शतायुधाय शतवीर्याय शतोतये भिमातिषा
हे । शतं यो नः शरदो अजीतान् इंद्रो नेषदति दुरितानि विश्वा स्वाहा । वसिष्ठ ऋषिः विरा
ट् त्रिष्टुप् छंदः सर्वे देवा देवता आज्यहोमे विनियोगः । येचत्वारः पथयो देवयाना अंत

रोद्यावापृथिवी वियंति । तेषांयो ऽन्या निमद्रीघ्निमावहात्तस्मैनो देवाः परिदत्तेह

सर्वे स्वाहा । वसिष्ठऋषिः त्रिष्टुप्छंदः ऋतवो देवता आज्यहोमे विनियोगः । ग्रीष्मो

हेमंत उत नो वसंतः शरद्वर्षाः सुवितं नो अस्तु । तेषामृतूनां शतशारदानां निवात

एषामभये स्याम स्वाहा । वसिष्ठऋषिः त्रिष्टुप्छंदः संवत्सरो देवताः [illegible] ज्यहोमे वि

नियोगः । इद्वत्सरायपरिवत्सराय संवत्सराय कृणुतायद्बृहन्नमः । तेषां वयं सुमतौ य

ज्ञियानां ज्योग्जीता अहता स्याम स्वाहा । ततः अभ्याधा यथिवद्धोमं कुर्यात् । पूर्ववत

स्विष्टकृदादिकं सर्वं तंत्रं ॥ स्विष्टकृदवदान स्थालीस्थनाज्यंग सहितं मेक्षणाग्रहणप

वर्जनेन मससनिनयनांतं प्रकृतिवत्कृत्वा । कृतशीर्षं हविः स्वजन्यस्थवल्मीकस्हतपनी

तपुत्रपौत्रादिभिःसहस्राश्नाति। पूर्वेणाम्नेयमाश्रयिवास्वयंआश्नीयात। तद्यथा।
इह स्तवोपस्तीर्य स्तनाभ्यंगं अद्भिरेव हस्तौ वासः स्थाणुं निमिरेहनेन। वसिष्ठऋषिः त्रिष्टु
प्छंदः अग्निर्देवता अन्नप्राशने विनियोगः। धुमदान्न श्रेयः समनेष्ट देवास्तुया वेश
नसमश्नीमहि वा। सनो मयोभूः पितेवा विशस्व शंतो कायतन्वे स्योन स्वाहा। अनावांत
एवमेव द्विरपवे कुर्यात्। यजुर्वेदे तूष्णीं। अथ यक्तृताव मनाः अंगाभिमर्शनं कुर्वी[illegible] सत्यंग
मेत्राहृत्याशिरः मुखं स्कंधो। पार्श्वे जंघे। पादौ चेति। अमोमीति वसिष्ठऋषिः त्रिष्टुप्छं
दः आणायामो देवता अंगाभिमर्शने विनियोगः। अमोसि प्राण तहृतं ज्ञवीम्य माह्यसि
सर्वमनुप्रविष्टः। समेजराः रोगाम पठ्यथारी राहपा महे खिमाम्हतान इंद्र। ततो मे द्रा

णमग्नौ हुत्वा वामदेव्यं गीत्वा समापयेत् । ततो ब्राह्मणान् भोजयेत् ॥ ॥ श्यामाकाय
वयोराग्रायणे एष एव विधिः ॥ ॥ मन्त्राणां मन्त्रे विशेषः । श्यामाकमग्रयणे अयं मं
20 वशिष्ठऋषिः स्वरानुष्टुप्छन्दः अग्निर्देवता श्यामाकमग्रयणे विनियोगः । अग्निः प्रा
श्नातु प्रथमः स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः स्वा २०
हा । यवआग्रयणे वशिष्ठऋषिः स्वराड्जगती छन्दः इन्द्रो देवता यवआग्रयणे विनियोगः ।
न्द्र एतमुत्यं मधुना संयुतं यवं सरस्वत्या अधि वनावचर्कृधि । इन्द्र आसीत्सीरपतिः
शतक्रतुः कीनाशा आसन्मरुतः सुदानवः स्वाहा । श्यामाकाग्रयणं वनस्पतिविष

यमेव । गृहीणां तु शारद्वसंतयोर्व्रीहियवयज्ञौ कर्तव्याविति निश्चयः । यवाग्रयणं तु
वैश्यामेव ॥ ॥ इत्याग्रायणपद्धतिः ॥ ॥ अथाग्रहायणीपद्धतिः ॥ तत्र प्रातराहु
त्यां हुतायां दर्भशमीशाखावीरणसफलावदरीशाखाऽपामार्गशाखाशिरीषशाखा
एतानि षट् । अन्ये नाहारयित्वा वहिर्हरणं कृत्वा शेषं शालाग्नौ तूष्णीं प्रक्षिप्य तत्र दर्भस्तु
स्वोपविष्टान् ब्राह्मणान् तांबूलादिना संतोष्य स्वस्ति वाचयित्वा दर्भादीन्युं [illegible]
न्यगारप्रभृति यावंतो गृहास्तन्निविपल्लादिसंलग्नं धूमं शातयन् सवीन्द्रहानु [illegible]

यात् । ततः कृतार्थो संभारान् गृहाद्बहिरुत्सृजेत् । ततो मणिकाधानमिमिशं
मा२ पूजास्तु दयिकं विधाय शालाग्नेरीशान्यां दिशि कुंडमिकं संचारमय
21 त् । जातशिला सुकर्कशाभिधानास्तु त्रिवृत्तिसूत्रसंवीस्या पितास्तु मणिकं स २१
निष्ठापयेत् । वास्तोष्पतइतिसामद्वय सक्तुसहितेन वास्तोष्पतइतिसामद्व
यस्य सक्तुसहितस्य कावषेषि: । अनुष्टुप्छंदः इंद्रो देवता घृताञ्जनिष्ठापने वि
नियोगः । ॐ वास्तोष्पते ध्रुवा स्थूणा॰ स श्रीरामचंद्रो जयति ॥ श्रीजगदीशः ॥

गः सौम्यानां । इध्मः पुरीमेता शश्वतीनामिन्द्रो मुनीनां सखा । तत्र माणिके द्वावुदकपू
र्णौ सिंचेच्च न्यूर्वं सन्निपेत । प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः आपो देवता आसेचने विनियो
गः । समंन्यायंत्युपयंत्यन्याः समानमूर्वं नद्यस्पृणंति । तमुशुचीः शुचयो दीदिवांसम
पान्नपातमुपयंत्यापः इति । ततो वामदेव्यगानं । अथ समये यदा कदाचिन्न होमो भवति । त
दैवक्रमेणैव विधिना अयं माणिकं संस्कुर्यात् । इदं श्रेष्ठं सदा उत्थायग्रहायणी तस्मिन्नेव
माणिके उदकुंभद्वयामेव नमसि मंत्रवत्करोति । नित्यमनुगुप्तोदकगर्दी पैन्नुमंत्रागहित्य
मिति माणिकाधानं ॥ ततः आग्रहायणीनिमित्तं मार्गे प्रजाभ्युदयिकं विधाय माणिका
धानकर्मणि ब्राह्मणान्भोजयित्वा ततः अयगर्के । उपवसथिकं दंपती भुंजीतः । अस्मिं

22

ते सायंहोमस्याकृ अत्रणा कर्मिवत्वलिं हरेत्। आकुशीर्षं यातनो नू स्त्रीअक्षितय संवरे नि
रत्य। नमः पृथिव्या इति मंत्र जपवर्जं। ततः सायंहोमं वैश्वदेवं कृत्वा पायसस्थालीपाक
मारभेत्। तत्र वह्नीपवेशनादि वामदेव्यगानांते विशेषः। आगन्म पितृलोकं निर्वपामि
इति। इति निर्वापः। होमस्य प्रथमाहुत्या सुवातेति वशिष्ठ ऋषिः निचृदनुष्टुप्छंदः आगूह २२
यणी देवता पायसहोमे विनियोगः। ॐ प्रथमाहव्या वासमासा धेनुरभवद्यमे। सा नः पयस्व
तीदुहा उत्तरां उत्तरां समां स्वाहा। ततः आयस्विष्टहोमादि वमसपूर्णांते तत्रैकवा
पस्मा दाने वर्हि षिन्यवोपाती ओति व्याघ्रति दत्त इति वशिष्ठ ऋषिः त्रिष्टुप्छंदः
रतीयान्हे स विराड्द्विपदा गायत्रीछंदः देवराट्प्रजाभ्य ग्रौजाप्यं गा मनायोवाप्र

दामायजीष्ठेदः दीजराष्ट्रा श्वगोवाशांसु त्यांगमनानाधावापृथिवीयज्ञदेवता ।। जपेवि
नियोग ।। ॐ प्रतिक्षेत्रप्रतितिष्ठामिराष्ट्रेप्रत्यश्वेषु प्रतितिष्ठामिगोषु । प्रतिप्राणेप्रतिति
ष्ठामिपुष्टेप्रत्यंगेषु प्रतितिष्ठाम्यात्मनि । प्रतिद्यावापृथिव्योः प्रतितिष्ठामियज्ञे ।।
ततोवरप्रार्थनं । स्याद्युषंकरणंच । ततोवामदेव्यंगायेत ।। इत्यग[illegible]डायनीपद्धतिः ।।
ततः स्वस्तराहोनमारभेत् । तद्यथा । शालाग्नेः पश्चिमतः । अन्यैः स्तृणपुलकैर्नवद्र
गतैस्तृणैस्यस्तरमास्तारयेत् । तदुपरिस्त्र्यहतानिवस्त्राण्यास्तीर्य स्वयं सर्वैरहतवा
ससयजमानगृह्याः स्वस्तरस्य दक्षिणाभागे गृहपतिरुपविशति तदुत्तरतः पत्नी तदुत्त
रतः यथाज्येष्ठं स्वस्वनाम्नीयथाऽप विशंति । एवं समुपविष्टे गृहपतिः स्वस्तरेन्यंचो ५

23 पाणीउतिष्ठाय ९ तामृचं जपति । वशिष्ठ ऋषिः निचृदनुष्टुप्छंदः पृथिवी देवता जपे ।
विनियोगः । ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथो देवान्
मयादिति । मनिसमनान्नायामृचि दक्षिणपार्श्वेनाक्रिरमतः स्वपेति । एवं ग्रामनक्षत्र
शयनीशं वेशन जपन् शोवेशनीत्यावं नाहिद्धिर पर्यंकुर्ष्कः । ततः ऋग्वेदादि स्वस्त्यय २३
नसामानि श्रुत्वब्राह्मणाः मौडनमसं कल्या । वामदेव्यं गीत्वा समापयेत् ॥ ॥ अथ पु
षष्ठुकाकर्मपद्धतिः ॥ तत्र । ऊर्ध्वमाग्राहण्याः कार्त्ताष्टम्यां भवति प्रथमप्रयोगे मातृपू
जाभ्युदयिकेन भवतः आनडुहं तिङ्क वास्थालीपाकमारभेत । ब्राह्मणोपवेशनादि वामदेव्य
गानांते विशेषः । पात्रासादने अष्टौ कपालत्रयरूस्थाल्यानंतरं आसादयेत् । अग्नेः पश्चि

मतः कं समस्थाने कं सद्वयं दृषदुपलं वासादयेत् । अष्टापूपचरुपर्याप्तं हविष आसाद
नं । अष्टकायै त्वा जुष्टं निर्वपामीति निर्वापः । ततः फलीकरणांतं प्रकृतिवत्कृत्वा तंडुला
न्द्विधा विभज्य एकं प्रक्षाल्य पवित्रांतर्हितायां स्थाल्यां प्रक्षिप्य द्वितीयभागं प्रक्षाल्य दृषद
दुपलाभ्यां पत्न्या पेषयित्वा पिष्टमुदकेन संपूय अष्टका विभज्य करतलप्रमाणान्म
ध्ये छिद्रितान् अष्टावपूपान् प्रथमद्वितीयादि पंक्तिर्नार्थं कृत विभागास्ते पाकप्रागग्रपवित्रांत
र्हितेषु कपालेषु तूष्णीं निवापचरुमधिश्रित्य अपूपानि अधिश्रयेत् । युगपत्कुर्पयेत् ।
श्रितेषु चर्वादिहि सर्वानभिघार्यारगुह्यास्य पुनः अत्यभिघारयेत् । ततः पूजयादि आज्य
भागांतेषु प्रधानहोमः । तद्यथा । स्रुचुपस्तीर्य हविष्यो राखवदाय कपूनां चैकैकस्मै हविर्दिन

ध्यान्पूर्वोद्वायमूहणं पश्चाद्धोहितिरश्तीर्यं सकृदुपस्तीर्याभिघार्य द्वे ताभ्यगां जत्येकं कवा
ष्टकायै स्वाहेति मध्ये जुहोति । इदमष्टकायै इति त्यागः । ततो ब्राह्मणाभ्याय स्विष्टहो
मेकृते स्विष्टकृद्धोमं कुर्यात् । तद्यथाऽस्तुप्तपत्नीर्यं उत्तरार्द्धपूर्वार्द्धे घोरेः कामुपेत्यस्व
24 सकृत्सकृद्ववदाय द्विरभिघार्य पंचावत्तिनां तु द्विरूपस्तरणसकृद्ववदान द्विरभि २४
घारणानीति । उत्तरार्द्धपूर्वार्द्धे अग्नये स्विष्टकृते स्वाहेति जुहुयात् । व्याहृत्यवामा
देव्यगानांतं कवाहृत पक्वापूपवृतनगवान मन्वाहार्यं कुर्यात् ॥ ॥ इत्यपूपाष्ट
का कर्मपद्धतिः ॥ समाप्तः । अष्टमांसाष्टका कर्मपद्धतिः ॥ तत्र छागपशुमधिकृत्य
लिख्यते प्रातर्होमानंतरं रुद्रयसमीप एव स्थापितपशुमग्नेः पुरस्तात् प्रत्यङ्मुख

तदस्थाप्य संस्कारस्यैवाऽऽज्यस्य मुखे तावन्माय पि ग्रहोमं न्यायेन स्रुवेयाद नेन
वाशिष्ठ ऋषिरनुष्टुप् छंदः पशवो देवताऽऽज्यहोमे विनियोगः। ॐ यत्पशवः प्रध्याय
त मनसा हृदयेन च। वाचा सहस्य प्राणाय यामयि वध्नामि वो मनः स्वाहा। ततोऽग्नेरुत्तरत
यवमिश्रमुदकं पवित्रं दक्षिणं मेकशाखाविशाखे पलाशाहत्के वर्हिरिध्मकाऽऽज्यं समि
धौ स्रुवं कूर्चं पूर्णपात्रमिति। ततो यवमिश्रोदकेनाग्नेः कार्ये वाऽस्तु ऋते श्रीस्वामी ति प
शुं श्रीखेन ततः शालाग्न्यास्रुक माहायपशोः प्रदक्षिणां परिगामयेत। इदं प्रजा
पतिऋषिः गायत्री छंदोऽग्निर्देवता स्रुक् परिगमने विनियोगः। ॐ परि वाजपतिः
कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे। ततः यवमिश्रोदकं पाययेत। पीतशेषो

दक्षेन पशोर्ग्रामीत्यरथः । अवसिंचेदनेन । वशिष्ठऋषिर्यजुर्हविर्देवताः आप्तेऽध्वने विनि
योगः । आसं देवेभ्यो हविः । अनेनानंतरं ततः पशुघ्नीं वपाकर्मारभेत दक्षपार्श्वे निपात्य
नासिकामुखं संगृह्य तमयंत्य वाभ्यमानं । इति तु संज्ञपनप्रयोगः । वेणुदिना वा । संज्ञ
25 पयंतीति वचनात् समितारो वदेद्वीज्ञवंति । मृते पशौ असंस्कृतामेवाज्यं श्रवेणोपह
त्य द्विरंहोमं न्यायेन जुहुयादनेन । वशिष्ठऋषिर्यजुर्ज्जपुष्टिच्छंदो अग्निर्देवता होमे वि २५
नियोगः । यत्पशुर्मायुमकृतोरो वा पद्भिराहत स्वाहा । ततः पत्नीं यजमानश्चोद
कमादाय दर्भकूर्चेन वृत्तीमुखं नासिके चक्षुषी कर्णौ नाभिमेढ्रं चक्षमेता
प्रक्षालयेत् । ततो नाभेरग्रतः पूर्वमाच्छिते पवित्रे आगग्रे पवित्रे अंतर्द्धाय छेदन ।

र्द्वीयकुशमादाय होमानुकूलं प्रक्षिप्य छेदनं मन्त्रैर्विना । पार्श्वयित्वा पांसवर्मणो रत्नां न
खर्जैर्नी वपामुद्धरन्निति । बोध्द्वत्य एकशाखा द्विशाखा काष्ठाभ्यां सपविशा पृथिव्या यज
मानः अभ्युद्वय श्रपयेत् । हूते नाभिघ्राणमिघ्राणार्थं श्रपयेत् । ततः अच्युतिन विंडकायाय
पायां यजमानः विशसप्येति त्रैः समिन्द्र आनिक्षु यात् । ततो विशासितास्वल्पथा विशसे
रन् । यथा अग्ने पुरस्तात् शोनितन गच्छेत् । यजमानस्तु आहूतवाचा श्रापयेच्च विशासि
तारः अपगतचर्मपशुं कुर्युः । ततः आघेणाज्यमाज्य वपामभिघार्योदिगुद्धास्य सया
ख विशाखां वपां पात्रां तरे निधाय प्रत्यभिघारयेत् । मूजपादिस्वाज्यमागांतं कृत्वा स्रु
चुपस्तीर्य वपां हिरण्यखंडं हि मांसकलानि वस्तु निधि पश्चात्तु पस्तीर्य स्रुः कायै स्वाहे

तिञ्जुहुयात् । ब्रह्मणा प्रायश्चित्तं जुहुयात् । ततः स्विष्टकृत विना वामदेव्यगानांतं समा
पयेत् । ततः स्थालीपाकमारभेत् । ब्राह्मणमुपवेश्य पात्रासादनं । तद्यथा । कांस्यस्था
26 लीमांसावदानं शूर्पणोर्ध्वं । अग्न्या पवित्र द्वयेन्द्रकमेक्षणाद्दय च्छुरकांसपात्रं गयल
भेशाश्वायुकाप्रस्तरस्तु वश्याज्यकुश ताहि शिध्मसमिद्वयं मार्गकुशास्तु कुपूर्णीया । २६
वं येति । अग्नेः पश्चिमतः श्च लूखलमुसल सह वि: शूर्पकं साधयचपाञ्जयेत्यौ आ
गम्या मेक्षण लांघत्यगग्रांयंहिश्च लामाह्वयागनौवृषीजुहुयात् । ततः अनियमात्या
मिताः एवपश्चोरवदानान्यवयंति । तद्यथा । हृदयं । जिह्वांशाखि । यकृत् । वृक्कौ । गु
दं । दक्षिणश्रोणि स्कंधशपार्श्वे पूर्वेनङ्कइति । वामं शक्थि क्लोमानं चावदायस्थ्व

ष्टक्यावरिष्यात् । ततः कुमारस्त्वाक्रमेणाऽवदानानि द्विद्वादशसंख्याकानि संगृह्य विन्ना
र्थं निदध्यात् । ततः अष्टकायै त्वाजुष्टं निर्वपामीति व्रीहीणां निर्वापकं डनन्नष्टकोडनां त
कृत्वा स्वरुं ऽवध्यात्म्यऽवदानानि यदि विशन्तर्हि तयोः स्थाल्या स्रुवयोः वक्रमवदानानि
वशद्विय ष्टश्रपे त्वाणाभ्यां चालयन् अपयेत् । ततः उमे हविषी अभिघार्य्योदग्द्वास्य
प्रत्यभिघार्य्य मूजपादिसमिदाधानांतं कुर्य्यात् । ततः अवदानं पूर्वं आसादितकांस्य
वमध्य एकस्मिंकंसे कृत्वा ततो वर्हिषि अग्ने । पश्चात् कुशानुत्तिष्ठल्तर मास्तीर्य तदुपरि
न्तशाखास्तीर्य तदुपरि क्रमेणावदानानि संस्थिकरोति । ततः द्वितीयकंसे उपस्ती
र्य द्वादशानामप्यवदानानां प्रत्येकः स्रुवेणमध्यात्पूर्वाद्धी द्वित्वेन न्यायेनावदा

यतस्मिन् कांसपात्रे प्रक्षिप्य अनेनैव न्यायेन मेक्षणेन चरुमवदाय तत्रैव प्रक्षिप्य
न्यग्रणं पश्चाद्धीक्षितिपंचमं । अन्तुपत्नीयं च ततामध्यमवदानानां तोषं कृत्वा । द्वितीयेकां
से प्रक्षिप्य कदर्थंस्तु पत्नीयर्थे मेक्षणेन वदानेभ्यः स्रुवेण उत्तरार्द्ध पूर्वार्द्धीऽल्पकमवदाय
27 वदाय कंसे कृत्वा तद्दैवतरो त्वदाय कंसे कृत्वा हिरमिश्चार्थं भक्षणं तु द्विरूपस्तरणं
ना नाभ्यंगमकृत्वा । न तत्कांसस्य पृष्ठेण सह संनयेत्स्थानं हविः । पश्चात्त्विष्टकृद्वि २७
स्य पश्चाद्दिवदाज्यमागोकृत्वा ततः स्रुवेणोपहत्य वत्तु गृहीतमाज्यं स्रुचि कृत्वा कस्त्र
स्पृणामपि चतुर्गृहीतमपि जुहुयादनेन । वसिष्ठ ऋषिः निचृदतिजगती छन्दः अग्नि
र्देवता आज्यहोमे विनियोगः । अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः

मनः स्योनः सन्तु प्रजायै प्रजाय घोर देवानां घनिमानि वेद स्वाहा । ततः प्रधान होमार्थं संनि
तस्य ददतीयां समह स्तिनैव स्तु पिक्त्वा ऽऽज्याभ्यां स्रुग्भ्यां जुहुयात् । अनयोर्वैशिष्ठ ऋषिः त्रि
ष्टुप् छन्दः अष्टका देवता मांसौदन होमे विनियोगः । उलूखलाः संप्रवदन्ति ग्रावा
णो हविष्कृण्वन्तः परिवत्सरीणां । एकाष्टके सु प्रजसः सुवीरा ज्योक्जीवेम बलिहृतो वयं ते
। इडायास्पदं घृतवत्सरीसृपं जातवेदः प्रतिहव्या गृभाय । ये ग्राम्याः पशवो विश्वरूपास्तेषां स
प्तानां मयि रन्तिरस्तु स्वाहा । तथैव द्वितीयां शमादाय वपाणिभ्यां जुहुयात् । अनयोर्वै
शिष्ठ ऋषिः त्रिष्टुप् छन्दः पुरस्ताद्बृहती छन्दः मांसौदन होमे विनियोगः । एषैव सा
या पूर्वा व्यौच्छत् सेयमप्स्वन्तश्चरति प्रविष्टा । वधूर्जिगाय प्रथमा जनित्री विश्वे ह्यस्यां

महिमानोऽन्तः । एषैव सा या प्रथमा व्यौछ्-साधेनुरभवद्विश्वरूपा । संवत्सरस्य या
पत्नी सा नो अस्तु सुमंगली स्वाहा । नये वर्त्तीयो ग्राम वद्दायद्माणाम्यां ड्कुयात ।
28 अनयोर्वशिष्ठ ऋषिः अनुष्टुप्छन्दः अष्टकारात्रि र्देवता मांसौदनहोमे विनियोगः ।
याद्देवाः प्रतिपश्यन्ति रात्रिं धेनुमिवायतीं । सा नः पयस्वती दुहा उत्तरामुत्तरां समां
संवत्सरस्य प्रतिमां त्वा रात्री यजामहे । अजामसर्वीरः कुरुरायस्पोषेण सप्रजः स्वा २८
हा । ब्रह्माग्नमधिश्रित्य होमे कृते शिष्टे हृदर्वेसंनीतं हस्तेन स्नुविरुवाञ्जुहुयाद्दने
नि । वशिष्ठऋषिरनुष्टुप्छन्दः अग्निर्देवता स्विष्टकृद्धोमे विनियोगः । अग्निर्हन्नो अ
नुमतिर्यज्ञं देवेषु मन्यतां । अग्निश्च हव्यवाहनः स नो दात्सुधां मयः स्वाहा । ततः स

मिद्धाधानादिकामहेव्यागानां तेगोर्दक्षिणं यथोक्तादिहिरण्यादिदक्षिणं नाब्राह्मणशतमो
जनान्तं तन्त्रं समापयेत् ॥ ॥इति मासाष्टकाकर्मपद्धतिः ॥ ॥ पञ्चवेसंमवेस्थालीपा
कं कुर्वीत तद्यथाऽऽतराकुर्तिं कृत्वा ब्रह्माणमुपवेश्य पात्रासादनं उलूखलमुसलव
निमित्रकाद्वादशपिंडपर्याप्तंहविरासादनं कोसस्थालीद्वयपवित्रयेतुष्टयं वामिको
दकमाज्यगुग्गुलुमवनेहाणकं सपात्रत्रयं ल तद्दर्भास्वायुक्तमसूत्तरस्तुवकाज्यकुशावर्हिः
समसमिद्वयसंमार्गकुशास्त्रुकपूर्णसपिंयावं वेति । ततः तं तुदनवकं अष्टकायै वा जुष्टं निर्वपा
मीति निरूप्य अग्नौ तीवस्थाल्यां अद्भिः प्रपाय चरुं तथा निरूप्य प्रक्षालनान्तं कृत्वा पवामि
श्रोदकेन अष्टकायै वा जुष्टं प्रोक्षामीति प्रोक्षयेद्वाजपरिति ॐ हूं केन परिहत्याप

विप्रो न हि तस्याल्पं वा लयन् प्रत्यभिधारणं तं कुर्यात् । ततः मृण्मयादि विष्णुपात्रान्ते
पायसचरोः पूर्वं कांस्ये आदाय तस्य द्वादश पिंडान् कृत्वा पश्चाद् दक्षिणे पितृस्थाने प्रस्तरे
पिंडान्त्रीन् निधाय द्वितीयकांस्ये तत्पत्नीभ्यः सर्वेषां पिंडानां मध्यात् व्रीहिभ्यामेव द्वा-
29 दशधा एककांस्ये कृत्वा । ततस्तु दक्षिणे द्विरवदाय मधुयुतं प्रस्थाय द्वितीये तत्पत्नीभ्यो
दत्वा तृतीये कांस्ये क्षीरास्य पुत्रस्य त्रिविष्टकृद्दर्थं पत्नीभ्यः सर्वेभ्यः पिंडेभ्यः उ-
त्तरार्धात्पिष्टं कांस्ये कृत्वा दक्षिणेन तत्रैवाग्निं परिषिच्य यथार्थं दत्त पृथिव्यासनये स्वधानमः
हविः स्विष्टकृद् विश्वात तत आस्य भागादि हिरण्यद् क्षिणान्तं तंत्रं पशुवत्समापयेत् ॥
इति स्थाली स्थाली पाकपक्षः ॥ ॥ गोष्ठाग्नि पक्षे हरिहरितदूर्वादि कांस्येन त्रिकांडस्य

मेष्टकेतिमंत्रेणागोरुपिंकारयेत् कंत्रोपाधानपक्षे ग्रामाद्बहिः नदीतीरे पर्वते वा
वकुरणकाष्ठादिपुरःप्रदेशेरणवृक्षंकूटीकृत्य लौकिकाग्निं संधुक्ष्य एषामेष्टके
तिक्रियाते ॥ इतिमध्याष्टकाकर्म्म ॥ ततोऽन्वाहार्यश्राद्धं ॥ ततोन्वष्टक्यकर्म्मम
परश्वोवा पित्र्यद्विपक्षे अन्तराकृतिं वाग्निशालातः आग्नेय्यां दिशि वकुरस्वरूपक्रो
माधिकं शविकाशकवंशीभवारयोग्यं वकुरस्थं कपादिना परिवृतं कारयेत् तत्र त्वद्वार
उत्तराद्वद्क्षिणार्द्धत्वेन भागद्वयकल्पनं । ततः कृतमाध्याह्निको यजमानो वैश्वदेवं प
रिवृत्तोत्तरभागे यज्ञोपवीती लक्षणकं पूर्वकं गृह्यं शालाग्निं प्रणयति । ततः प्राची
नावीती भूत्वा आग्नेय्यां दिगभिमुखः अग्नेः पश्चात् ज्ञानमासादयति दक्षिणासंस्थं ।

तद्यथा । सह हविः शूर्पोलूखलमुसलकं वरुणस्थाली हृदयमांसमुदकं पवित्रं वस्तुषय
मेदग्राहृदयशूलवाप्यनूतनकाष्ठं कुठारं रज्जतमूषितं समक्रौ खनित्रं सकृदाच्छिन्नमु
30 च्छियन्तु सूयवेति । ततश्च मसोदकेन ओष्यसक्त सगृहीतं भूषिथंजीहि मुष्टिको मेदो
त्वा पितृन्यस्थानुष्ठं निर्वपामीति उलूखले निक्षिप्य ऋतु निर्वीपरहितं सस्थालीश्यां
पाणिभ्यां मुशलं गृहीत्वा सतृ वदह्न्य शूर्पेण निःपूयसकृत्स्थाल्यां ततः क्षौमवासस क्रु ३०
म्मोमांसं नवे काष्ठफलके धृत्वा कुठारादिना सूक्ष्मतुच्छिवा समकृत्स्थाल्यां दक्षिणाग्रपवि
त्रांतर्हितस्थाल्यां यथाक्रमं तदनु मांसवत्सदेपः तथैवोदकं वक्षित्वायुगपद्दक्षिणेयेन
मेक्षणान्यानसुदक्षिणेवालयनुत्रपयेत । अनावनि द्वार्थ्य दक्षिणे तत्र ग्रामनगरनि

चारयेत्। ततः परिवृतस्य दक्षिणार्द्धं पूर्वीमाहितं। माङ्गुं सव्येनादाय दक्षिणेन गृहीत्वावा
ग्निदङ्मुखा यवमध्याप्रादेशमात्राः श्वकुरे गुलस्थाताः सार्द्धगुलांतवा दक्षिणस्याः प्र
स्तिस्रः कर्षूः खनित्रादिनास्वातयेत्। तदसंभवे स्रुवं खनेन। ततो यज्ञोपवीति प्राङ्मुखा
कर्षूः पुरस्तादुपविश्य लक्षणां कृत्वा प्रणीताग्नेरेकदेशं पात्रेण गृहीत्वा कर्षूणां पश्चिम
त आनीय स्थापयेत्। समिधं दत्वा दर्भमुष्टिमादाय सव्यापसव्यं परिस्तीर्य प्राचीनावीतिद
क्षिणामुखः कर्षूणामुत्तरत उपविश्योपमूलक्कुशमुष्टिं सव्येनादाय दक्षिणेन गृहीत्वा
आग्नेयाग्रे दर्भे कर्षूस्तृणुयात्। तथैव मध्यमोत्तमे। ततो यज्ञोपवीति कर्षूपश्चादुपवि
श्य दक्षिणाग्रैः कुशैर्दक्षिणापवर्गं स्वस्तरमास्तारयेत् अन्यामार्गे स्वयं स्तरेत्। ततः स्व

स्तरेद्वयंसीनिदध्यात्। ततः पुत्रः शिष्यो वा वक्तव्यमिति निपात्राणि यजमानसव्यं वाङ्गुमव
निदधाति यजमानस्य स्तरे आसादयति। यथा। उदनमांमम्भो ल्वो मेध्यौ णो केमेदर्वी
31 स्रुस्वाँ लेस्वार्घं दर्भपिंजुलीमवनेजनपात्रत्रयं तिलयवकुशधूपदीपचंदनपुष्पाणि।
नयानिति। अथपत्नीस्य स्मारे शिलां निधाय चंदनादि पुरभिद्रव्यांपिनष्टि। सौवीरांजनं
वनिघ्रुष्याति। तेन मिस्त्रोदर्भपिंजुलीरंजति शलिलिशलाकावर्तिवयति तिलतैलं ३१
व्योमदर्शांवोपकल्पयेत्। अथकार्ष्णां दक्षिणप्रदेशे ब्राह्मणोपवेशनमात्थं सास्तनानिके
ल्पयित्वा पूर्वनिमंत्रितान्यंचब्राह्मणान्नाहूय पादप्रक्षालनाचमनदानांते यथाविधिश्र
द्धं कुर्यात्। ततः आचीनावीती। अवनेजनार्थमासादितपात्रेषु दक्षिणासंस्थेन तूष्णीमुदकं क्षिपादक्षिणाहस्ते
निलोदकं

अमुकगोत्र पितः अमुकशर्मन् एतत्ते तिलोदकं ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्व-
धेति पात्रे दत्वा अपसव्यमुपस्पृश्य एवं पितामहस्य प्रपितामहस्य स्वपात्रद्वये दद्यात् । अन्नैव
गोत्रनामाद्युच्चारेण गंधोदकं पात्रेषु दातव्यं । ततः चंदनादिनानभ्यर्च्य श्राद्धविधिना
भोजनार्थं पात्राणि दत्वा उपवीती भूत्वा अग्नौकरिष्यामीति पृष्ट्वा कुर्वीत । ब्राह्मणैः कुरोक्तं
सपात्रे उद्धृतमांसव्यञ्जनं घृतमवदाय श्रीतपाणी तस्याग्नेः पश्चादुपविश्य भूजपाद्रिम
मित्रादिधानोक्तं क्षिप्रहोमवत् कृत्वा कव्यवाहनाग्निर्यावाद्योदन वक्रमेधो नमामि सिओ
नस्तुपहत्य वशिष्ठ ऋषिः यजुः पितृसोमो देवता होमे विनियोगः । स्वाहा सोमाय पितृ
मते इति हुत्वा । वशिष्ठ ऋषिः । यजुश्छंदः । कव्यवाहनाग्निर्देवता होमे विनियोगः ।

स्वाहाग्नये कव्यवाहनायेति द्वितीयामाहुतिं जुहुयात् । ततः मेक्षणादयमग्नेर्प्रहृत्य स
मिद्धाधानादिव मस पूरणान्तं कृत्वा प्राचीनावीति हुतशेषं किं चिल्पिय्य ब्राह्मणभिपात्रेषु नि
32 क्षिपेत् । ततः परिवेशनादिद्रुष्टैः सहापि भुज्यतामित्यत्र प्रकृतिवत्कृत्वा । ततः पत्नीमु
ऋठेषा किंचिद्विलाद्यांकं सम्यतं मोदनेन संमिश्र्य त्रीणि पिंडान्करोति । ततो यजमानः
प्राचीनावीती कर्षूत्तरतो आग्नेयाभिमुख उपविश्य पूर्वामाहितां दर्भपिंजुलीं सव्ये ३२
नादाय दक्षिणेन गृहीत्वा कर्षूणां मध्ये दक्षिणाग्रास्ते स्वामुल्लिखेत् । अनेन वमिस्व
ऋषिः पङ्क्तिश्छन्दोऽग्नी देवता लिखाकरणे विनियोगः । अपहता असुरा रक्षांसि वेदिषद
इति । ततः सव्येन प्रतिप्रणीताकृतहोमाग्नेरुल्मुकं गृहीत्वा सव्यावर्तेन दक्षिणेन क

दर्भाणां दक्षिणाग्रतो निदध्यादनेन । वसिष्ठ ऋषिस्त्रिष्टुप्छंदः अग्निर्देवता उल्मुकनिधाने
विनियोगः । ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्य
ग्निष्टांल्लोकात्प्रणुदात्वस्मात् । अथ पक्वान्नांजलिः । कर्षूषु पितॄनावाहये इत्यनेन वसिष्ठ
ऋषिः । यजुः पितरो देवता आवाहने विनियोगः । एत पितरः सोम्यासो गम्भीरेभिः पथिभिः
पूर्व्येभिः । दत्तास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छत । ततः पूर्वास्वादित पात्रा
ण्यग्रतः पात्रं गृहीत्वा अथ मध्ये कर्षूं अमुकगोत्रास्मत्पितरमुकशर्मन् । अवनेनिक्ष्वये
चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति दर्भेषु निर्वपेत् अप उपस्पृश्यैवमेवेतरयोः । य
द्विनामानि न विद्यात्स्वधा पितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिंडं निदध्यात् । स्वधा पितृभ्यो

त शिष्ठ षड्ङ्गा इति द्वितीयं स्वधा पितृभ्यो द्विविषद्भ्य इति तृतीयं । ततः कृतांजलिर्डपत्नि । व
शिष्ठ ऋषिः स्वरा द्विपदा गायत्री छंदः पितरो देवता जपे विनियोगः । अत्र पितरो मादय
ध्वं यथा भागमावृषायध्वमिति । ततो ऽपरद्विणं मुद्गानमाहृत्य पुरो ह्वासाहितं मभिपर्यावि
33 र्तमानोऽपेत्य वशिष्ठ ऋषिः स्वरो द्विपदा गायत्री छंदः पितरो देवता जपे विनियोगः । अमी
मदंत पितरो यथा भागमावृषायिषतेति । ततः पूर्वोत्साहित दर्भपिंडुलीं गृहीत्वा स्त्रुक 33
णोगात्मन्पितरस्त्रुकमाज्यं ते तरे ह्याञ्जनं येवाग वेति । अपस्तथ स्पृष्ट्येव मेवेतरयोः । त
तः अनेनैव क्रमेणातैलं धाति पिंडं दद्यात् तथैव स्त्रुवमभ्येतनैतलं एतद्वोस्तुरभि इति प्रत्येकं
तामंत्रे दद्यात् इति पूर्वस्यां कर्षौ दक्षिणाग्ने पाणीन्दृक्वा वशिष्ठ ऋषिः यजुः पितरो देवता नाम्निहवने

विनियोगः । नमो वः पितरो जीवाय पितरः शूषाय इति । अथ मध्यमायां सव्येजानो । वशि
ष्ठ ऋषिः यजुः पितरो देवता निह्नवने विनियोगः । नमो वः पितरो घोराय । नमो वः पित
रो रसायेति । उत्तमायां दक्षिणोत्तानो कृत्वा वशिष्ठ ऋषिः यजुः पितरो देवता निह्नवने वि
नियोगः । नमो वः पितरः स्वधायै नमो वः पितरो मन्यव इति । अथ कृतांजलिर्जपति । नमो
वः पितरः पितरो नमो व इति । ततः गृहानवेक्ष्य गृहान्नः पितरो दत्तेति जपति । ततः पूर्वासा
हितां द्वौ मदक्षां सव्येनाहाय दक्षिणेन गृहीत्वा । गोत्र पितः । अमी मुशर्मन् । एतद्वो वासो
पेयाम्र चेति पूर्ववत् । अथ नपसः श्रेयव मेवेतरयोः । ततः पिंडान्सं पुष्प धूप दीपनैवेद्यादि
कं दत्वा सुप्रोक्षितमस्तु । स्वधेत्यं तं कृत्वा युक्तपात्र यज्ञनं कृत्वा तस्मिन्नेवोदकं विश्वि ।

34

ग्रासश्चैनादाय दक्षिणेन गृहीत्वापि तीर्थेन पश्चिमाच्छादितपिंडोपरि स्वधानिनयनीयां
क्षमस्व घातनेन । वासिष्ठ ऋषिः । निचृद्विराट् छंदः । पितरो देवता पिंडपरिसेचने विनियो
गः । ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिश्रुतं । स्वधास्थ तर्पयत मे पितॄन् । इति
ततः मध्यमे पिंडं पत्नी पुत्रकामा प्राश्नीयात् । भोजनकाले । अनेन वसिष्ठ ऋषिः गायत्री
छंदः पितरो देवता पिंडप्राशने विनियोगः । ॐ आधत्त पितरो गर्भं कुमारं पुष्करस्रजं । य
थेह पुरुषः स्यात् । इति । ततो दक्षिणोदकमादाय वसिष्ठ ऋषिः भूरिक् त्रिष्टुप् छंदः जात
वेदो देवता उल्मुकापसर्पणे विनियोगः । ॐ अमृतौ हुतौ हविषा जातवेदा अवाड्व्यानि
सुरभीणि कृत्वा । प्रादाः पितृभ्यः स्वधया ते अक्षन्नप्रजानन्नग्ने पुनर्देहि योनिमिति । उल्मु

उपविश्य द्वितीयं दर्भमुष्टिं सव्येनादाय दक्षिणेन सव्यान्वारब्धेन दक्षिणाग्रं कुर्वन्मध्ये
स्तीर्त्वा पात्रमपस्तूष्णीं जलमंत्रेण तिलोदकेन गंधोदकेन उपवीती प्राङ्मुखो तिष्ठन्नग्नि
तस्य पश्चादुपविश्य सव्यान्वारब्धः सर्ववर्णकंसे होवामेन पाणिना समिध्यमग्निं प्रणीतस्य पश्चा
न्निधाय गृह्यपरस्तीर्णं परिसमूहन परिषेचन पर्युक्षण समिदाधानादि होवा कव्यवाहना
ग्निमावाह्य तेन पाणिनोपहत्य स्वाहा सोमाय पितृमत इति अग्नये कव्यवाहना
येति द्वितीयं होवामेन पाणिना अग्नौ अहत्य समिदाधानादि उदपात्र निनयनांतं कृत्वा प्रा
चीनावीती भूत्वा कर्षूत्तरत उपविश्य सव्येन दर्भपिंजूलीमादाय सव्यान्वारब्धदक्षिणेन
कर्षौ तेऽपहता इति दक्षिणायां लेखायामुल्लिख्य हस्तांजलिरेनपि नर इति पितृनावाह्य

35

मीपिंडुली वश्युदपात्रमादाय पितृतीर्थेन ऽस्तु कोणे अस्मत्पितः अमुकशर्मन्नत्राव
नेनिक्ष्व ये चात्र त्वानुयांश्च त्वमनु तस्मै ते स्वधेत्यप उपस्पृश्य एवं पितामहप्रपितामह
हायोरपि। वामसव्येन दर्वीं गृहीत्वा पिंडमादाय दर्वीं निधाय दक्षिणहस्तपितृतीर्थेन गो
त्रनामपूर्ववत्। एष ते पिंडो ये चात्र त्वानुयांश्च त्वमनु तस्मै ते स्वधेति दत्वाप उपस्पृश्य
एवं पितामहप्रपितामहाभ्यां दत्वा अत्र पितर इत्यर्द्धं जप्त्वा वाममावृत्य प्राणान्नियम्या ३८
दृश्यावा तनैवागत्य अमीमदंतेत्यर्द्धं जप्त्वा एतद्वः पितरो वास इति सूत्राणि प्रति
पिंडं दत्वा ऊर्जं वहंतीरित्यर्घ्यं दत्वा मध्यमं पिंडं आधत्तेति दद्यादेव। ततः उलूखल
दीनि पात्राणि दंडं जप्त्वा ल्पयत्यतिहारयेत् इतरपिंडद्वयमग्नौ प्रक्षिपेत् अग्निच्छायज्ञो

पवीती भूत्वा यमस्य स्वधाहार्य्यैः श्राद्धमारभेत् ॥ ॥ अथ शाकाष्टकाकर्म्मपद्धतिः ॥ ॥
तत्र माघ्यां गर्द्धमष्टम्या मवति घामराहुतिं कुत्वा कर्म्म आरभेत । अग्न्युपवेशनादि वाम
हेव्यगानां ते विशेषः । पात्रमादने चरुस्थाली द्वयं मेक्षणाद्वयं तंडुलानंतरं शाकं पवित्र
वत्तुष्टय इति निर्द्दिष्टे अष्टकायै स्वाजुष्टं निर्व्वपामीति व्रीहिप्रक्षालनानंतरं शा
लाल्य चरुस्थाल्यां व्रीहीन् प्रक्षिप्य द्वितीयस्थाल्यां शाकं प्रक्षिप्य युगपच्छ्रपयेत् । अभिघा
र्य्यैद्गुह्रासय प्रत्यभिघारयेत् । ततो भूत्वपाहि आज्यभागांतेऽथान्नहोमः । आज्यतप
स्तीर्थ्यपद्या त्पूर्वीर्द्धी चरोरवदायान्तरे च शाकमवदाय प्रत्यभिघार्य्य चरुशाकयोः सतामं
गंकाचा अष्टकायै स्वाहेति जुहुयात । ततः आघापयित्वे ब्राह्मणाज्ञते स्विष्टकृदर्धमुपन्नी

३६

36

र्थं वर्षे शाकाब्द ग्रसराद्रि पूर्वाद्धे प्रत्येकमवदायद्विरूपस्तीर्य्येऽर्द्धकुर्यात् । न ... ष्टं
कृतिवत् । ततः श्राकव्यंजनप्रधानमन्वाहार्यं श्राद्धं कुर्य्यादिति ॥ ॥ इत्यावसथ्या-
धानपद्धतिः समाप्तः ॥ ॥ श्रीजगदीशो जयति ॥ शुभमस्तु ॥ शाकाब्दाः १५४० ॥
अवाडीपरमानंदस्य पुस्तकमिदं ॥ श्रीरामचंद्रो जयति ॥ श्रीविश्वनाथो जयति ॥ ॥

॥ आवसथ्याधानपद्धति ॥

१००